# प्रज्ञापारमिताहृदयसूत्रं

नमः सर्वज्ञाय ।

आर्यावलोकितेश्वरो बोधिसत्त्वो
गंभीरायां प्रज्ञापारमितायां चर्यां चरमाणो व्यवलोकयतिस्म ।
पञ्चस्कन्धास्   तांश्च स्वभावशून्यान्पश्यतिस्म ।

इहशारिपुत्र रूपंशून्यता शून्यतैवरूपं
रूपान्नपृथक्शून्यता शून्यातायानपृथग्रूपं
यद्रूपं साशून्यता याशून्यता तद्रूपम् ।
एवमेववेदनासंज्ञासंस्कारविज्ञानानि ।

इहशारिपुत्र सर्वधर्माः शून्यतालक्षणा
अनुत्पन्ना अनिरुद्धा अमलाविमला अनूना अपरिपूर्णाः ।

तस्माच्छारिपुत्र शून्यतायां नरूपं
नवेदना नसंज्ञा नसंस्कारा नविज्ञानम् ।
न चक्षुःश्रोत्रघ्राणजिह्वाकायमनांसि
न रूपशब्दगन्धरसस्प्रष्टव्यधर्माः
नचक्षुर्धातुर्यावन्न मनोविज्ञानधातुः
न विद्या नाविद्या नाविद्याक्षयो   यावन्नजरामरणं नजरामरणक्षयो
नदुःखसमुदयनिरोधमार्गा   नज्ञानं न प्राप्तिर्नाप्राप्तिः ।

तस्माच्छारिपुत्राप्राप्तित्वाद्बोधिसत्त्वः
प्रज्ञापारमितामाश्रित्य विहरत्यचित्तावरणः ।
चित्तावरणनास्तित्वादत्रस्तो
विपर्यासातिक्रान्तो निष्ठनिर्वाणः ।

त्र्यधवव्यवस्थिताः सर्वबुद्धाः प्रज्ञापारमिताम् आश्रित्य
अनुत्तरां सम्यक्संबोधिं अभिसम्बुद्धाः ।

तस्माज्ज्ञातव्यं   प्रज्ञापारमिता महामन्त्रो महाविद्यामन्त्रो
ऽनुत्तरमन्त्रो ऽसमसममन्त्रः सर्वदुःखप्रशमनः
सत्यममिथ्यत्वात् ।   प्रज्ञापारमितायामुक्तो मन्त्रः ।

तद्यथा गते गते पारगते परसंगते बोधि स्वाहा ।

इति प्रज्ञापारमिताहृदयसूत्रं समाप्तम् ॥